## (1069) "प्रस विस्तारे" (I-भ्वादिः-766. अक. सेट्. आत्म.)

घटादिः षिच्च । '—प्रसवे ।' इति क्षीरस्वामी ।

प्रासकः-सिका, प्रसकः-सिका, पिप्रसिषकः-षिका, पाप्रसकः-सिका ; [1]प्रसा, [2]प्रासः, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्रथतिवत् (206) ज्ञेयानि । [A]प्रसमानः ।

## (1070) "प्रा पूरणे" (II-अदादिः-1061. सक. अनि. पर.)

प्रायकः-यिका, प्रापकः-पिका, पिप्रासकः-सिका, पाप्रायकः-यिका ; इत्यादीनि सर्वाण्यपि रूपाणि आदादिकदाप्धातुवत् (833) ज्ञेयानि । [3]प्रायः, [4]प्रान्-प्रान्तौ-प्रान्तः, [5]प्राणः[B]-प्राणवान् इति रूपाणि भवन्त्यस्येति विशेषः ।

## (1071) "प्रीङ् प्रीतौ" (IV-दिवादिः-1144. अक. अनि. आत्म.)

'प्रीङ् प्रीतौ प्रीयतेऽप्रीणात् प्रीणीते तर्पणे ञितः ॥
अणौ यौ ञित्त्वसाफल्यात् प्रीणयेत् प्रयते प्रयेत् ।' (श्लो. 19 20) इति देवः ।

प्रायकः-यिका, प्रायकः-यिका, पिप्रीषकः-षिका, पेप्रीयकः-यिका ; [6]प्रियः-इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकधीङ्धातुवत् (901) ज्ञेयानि ।

---

1. षित्त्वात् स्त्रियां भावादावङ् इति ज्ञेयम् ।
2. 'हलश्च' (3-3-121) इति संज्ञायां घञ् । प्रासः=शब्दचित्रम् ।
3. 'श्याऽऽद्व्यध—' (3-1-141) इत्यादिना कर्तरि णप्रत्यये युगागमः ।
4. शतरि, शपि, 'अदिप्रभृतिभ्यः—' (2-4-72) इति शपो लुकि, 'पदान्तस्य' (8-4-37) इति निषेधात् णत्वं नेति ज्ञेयम् ।
5. 'संयोगादेरातो धातोर्यण्वतः' (8-2-43) इति निष्ठानत्वे, णत्वे च रूपम् ।
6. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कप्रत्ययः । एतच्च आत्रेयादीनां मतेनोक्तम् । काशिकायां तु 'प्रीणातीति प्रियः ।' इति क्रैयादिकस्यैव कप्रत्ययः प्रोक्तः ।

A. 'गोपीघटाः प्रव्यथितास्तदानीं पृथूवताप्रसमानचिन्ताः ।' धा. का. 2.4.

B. 'व्यान्त्यः कथाः प्राणमुदां पतीनां निर्मन्त्य इष्टानि चटून् वचत्यः ।' धा. का. 2. 50.